## अज्झनगमां सनि। (१६/२६१४)

अजन्तानाम् अङ्गानां [1]हनिगम्योश्च सनि झलादौ [2]परे दीर्घो भवति। अजन्तानाम् – चिचीषति। तुष्टूषति। चिकीर्षति। जिहीर्षति। हन् – जिघांसति। गम् – अधिजिगांसते।

[७७५] गमेरिङादेशस्येति वक्तव्यम्। (म. भा. ३.१८४)

इह मा भूत् सञ्जिगंसते वत्सो [3]मात्रा (म. भा. ३.१८४) इति। [4]स्वर्गं लोकं समजिगांसत्' इति [5]छन्दसि यदनिङादेशस्यापि दीर्घत्वं [6]दृश्यते, तद् 'अन्येषामपि दृश्यते' (६. ३. १३७/३५३९) इत्यनेन भवति।

अथ वा इहाज्ग्रहणं न कर्तव्यम्। सनि दीर्घो भवति इत्येतावदेव सूत्रं कर्तव्यम्। [7]तत्राचा गृह्यमाणस्य [8]विशेषणे सति सिद्धमजन्तस्य दीर्घत्वम्? तत् क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम्, अजन्तस्याङ्गस्य दीर्घो भवति, अजादेशस्य गमेः इति। ततो न वक्तव्यम् इदं गमेरिङादेशस्य इति॥

## तनोतेर्विभाषा। (१७/२६२२)

तनोतेरङ्गस्य [9]सनि झलादौ विभाषा दीर्घो भवति। तितांसति, [10]तितंसति। झलि इत्येव, तितनिषति। सनीवन्तर्ध (७.२.४९/२६१८) इत्यत्र तनोतेरुपसङ्ख्यानाद् इडागमो [11]भवति विकल्पेन॥

## क्रमश्च क्त्वि। (१८/३३२०)

क्रम उपधाया [12]विभाषा दीर्घो भवति क्त्वा प्रत्यये झलादौ परतः। क्रन्त्वा, क्रान्त्वा। झलि इत्येव, क्रमित्वा। प्रक्रम्य, [13]उपक्रम्य इति बहिरङ्गोऽपि ल्यबादेशोऽन्तरङ्गानपि विधीन् बाधते इति पूर्वमेव दीर्घत्वं न प्रवर्तते॥

## छ्वोः शूडनुनासिके च। (१९/२५६१)

छ इत्येतस्य सतुक्कस्य, वकारस्य च स्थाने यथासङ्ख्यं श् ऊठ् इत्येतावादेशौ भवतः, अनुनासिकादौ प्रत्यये परतः क्वौ झलादौ च क्ङिति[14]। प्रश्नः। विश्नः। अन्तरङ्गत्वात् 'छे च' (६.१.७३/१४६) इति तुकि कृते सतुक्कस्य [15]शादेशः। वकारस्य ऊठ्–स्योनः। सिवे[16]रौणादिके न प्रत्यये (उ. २९३) लघूपधगुणात् पूर्वमूठ् क्रियते। तत्र कृतेऽन्तरङ्गत्वाद् यणादेशो नानाश्रयत्वात् च न 'वार्णादाङ्गं बलीयः' (व्या. प. ३९) भवति। क्वौ छस्य–शब्दप्राट्। 'क्वब्वचि' (उ. २२५) इत्यादिनौणादिकः क्विप् दीर्घश्च। गोविट्। वकारस्य – अक्षद्यूः।

---

1. हनगम इत्येतयोः ह. 2. परतः क. फ. ह. 3. मात्रा नास्ति फ, मातरम् ह. 4. स्वर्गं लोकं नास्ति क, स्वर्गं तु फ. 5. छन्दसि नास्ति ह. 6. क्रियते ह. 7. तत्र च क. ह. 8. विशेषणेति सिद्धम् क. 9. सनि परतः ह. 10. नास्ति क, सन्तितांसति, सन्तितंसति ह. 11. भवति नास्ति ब.क. 12. विभाषा झलादौ ह. 13. उपक्रम्य नास्ति फ. 14. परतः इत्यधिकम् ह. 15. श आदेशः फ. ह. 16. औणादिकेन प्रत्ययेन क.